Page No.
Date

# भारतभूषा संस्कृतभाषा

भारतभूषा संस्कृतभाषा विलसतु हृदये हृदये ।
संस्कृतिरक्षा राष्ट्रसमृद्धिः भवतु हि भारतदेशे ॥ध्रु॥

श्रद्धा महती निष्ठा सुदृढा स्यान्नः कार्यरतानाम् ।
स्वच्छा वृत्तिर्नव उत्साहो रत्नो विना विरामम् ॥
न हि विच्छित्तिशिथिलविकारः पदं निदध्मः सततम् ।
सत्यपि कष्टे विपदि कदापि वयं न यामो विरतिम् ॥१॥

श्वासे श्वासे रोमसु धमनिषु संस्कृतवीणाक्वणनम् ।
चेतो वाणी प्राणाः कायः संस्कृतहिताय नियतम् ॥
श्वसिमि प्राणिमि संस्कृतवृद्ध्यै नमामि संस्कृतवाणीम् ।
पुष्टिस्तुष्टिस्संस्कृतवाक्तः तस्माहते न किञ्चित् ॥२॥

नाहं याचे हारं मानं च चापि गौरववृद्धिम् ।
नो सत्कारं वित्तं पदवीं भौतिकलाभं कञ्चित् ॥
यस्मिन् दिवसे संस्कृतभाषा विलसेज्जगति समग्रे ।
मत्यं तन्महदद्भुतदृश्यं काङ्क्षे वीक्षितुमाशु ॥३॥

॥ भारत माता की जय ॥